द्रङ्गं, क्ली, (आङ्क्ष्यतेनेति । आङ्क्ष आकाङ्क्षायाम् + ल्युट् । पृषोदरादित्वात् साधुः ।) तोलकम् । इति शब्दमाला ॥ तत्पर्य्यायः । कोलम् २ वटकम् ३ कर्षार्द्धम् ४ । इति वैद्यकपरिभाषा ॥ (पुंलिङ्गेऽपि । यथा,—
"————तद्वयं कोल उच्यते ।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ॥"
इति पूर्ब्बखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

द्रङ्गः, त्रि, पुरी । इति हेमचन्द्रः ।४।३७। (यथा, राजतरङ्गिण्याम् । ८ । २०११ ।
"तेन खनाख्या भाक्षिस्तु द्रङ्गे सिन्धुरमुद्रया ॥")

द्रढिमा, [न्] पुं, (दृढस्य भावः । दृढ+"पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति इमनिच् । "र ऋतो हलादेर्लघोः ।" ६।४।१६१ । इति ऋकारस्य रकारः ।) दृढ़ता ॥ (यथा, शिवशतके । ४३ ।
"मधुगुरुतुलनातुलाप्रकाण्ड-
द्रढिमगुणः स भवद्गुणावयस्य ॥")

द्रढिष्ठः, त्रि, अयमनयोरेषां वा अतिशयेन दृढ़ः । इत्यर्थे इष्ठप्रत्ययेन साध्यः । द्रढीयान् ॥

द्रप्सं, क्ली, (दृप्यत्यनेनेति । दृप+बाहुलकात् सः । इति निपातनात् साधुः ।) घनेतरदधि । पया दइ इति भाषा । इत्यमरः । २ । ९ । ५१ ॥ अस्य रूपान्तराणि । द्रप्सम् २ द्रप्सम् ३ द्रप्स्यम् ४ । इति तट्टीकायां भरतः ॥ (शुक्रम् । इति निरुक्तम् । ५ । १४ । त्रि, द्रुतगमनशीलः । द्रुतवहनशीलः । यथा, ऋग्वेदे । ९ । ६९ । २ ।
"पवमानः सन्तनिः प्रघ्नतामिव
मधुमान् द्रप्सः परिवारमर्षति ॥")

द्रम, गतौ । इति कविकल्पद्रुमः । (भ्वां-परं-सकं-सेट् ।) दन्त्यवर्गतृतीयादिः । द्रमति । इति दुर्गादासः ॥

द्रवः, पुं, (द्रु+"ऋदोरप् ।" ३।३।५७ । इति भावे अप् ।) परीहासः । पलायनम् । इत्यमरः । १ । ७ । ३२ ॥ (यथा, हरिवंशे । २११ । १० ।
"ततो दैत्यद्रवकरं पौराणां प्रह्र्षमुत्तमम् ॥")
रसः । गतिः । इति विश्वः ॥ वेगः । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । १६३ । ५ ।
"तत्र शब्दगतिर्भूत्वा मारुतद्रवसम्भवः ॥"
द्रवत्वरूपो गुणविशेषः । यथा, भाषापरिच्छेदे । ८ ।
"गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥"
आर्द्रे, त्रि । यथा, रघुः । ७ । ७ ।
"प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचित् द्रवरागमेव ॥")

द्रवजः,पुं,(द्रवात् जायते इति । जन्+डः ।) गुड़ः । इति राजनिर्घण्टः ॥ द्रवजातवस्तुमात्रञ्च ॥

द्रवणं, क्ली, (द्रु+भावे ल्युट् ।) गमनम् । (यथा, हरिवंशे । १६६ । ३६ ।
"ते रुदन्तो द्रवन्तश्च भगवन्तं पितामहम् ।
रोदनाद्द्रवणात् चैव ततो रुद्रा इति स्मृताः ॥")
क्षरणम् । अनुतापः ॥ द्रुधातोर्भावेऽनट् ॥

द्रवत्वं, क्ली, (द्रव+त्व ।) द्रवस्य भावः । तद्द्विविधम् । यथा,—
"सांसिद्धिकं द्रवत्वं स्यात् नैमित्तिकमुदाहृतम् ।
सांसिद्धिकन्तु सलिले द्वितीयं क्षितितेजसोः ॥
परमाणौ जले नित्यमन्यत्रानित्यमुच्यते ।
नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु ॥
द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् ॥"
इति भाषापरिच्छेदः ॥

द्रवत्पत्री, स्त्री, (द्रवत् पत्रं यस्याः । ङीष् ।) शिल्पड़ीवृक्षः । इति राजनिर्घण्टः ॥

द्रवन्ती, स्त्री, (द्रवतीति । द्रु+शतृ+ङीप् ।) नदी । इति शब्दरत्नावली ॥ मूषिकपर्णी । मसाकाणी छोटा इति भोयनी इति च हिन्दी भाषा । तत्पर्य्यायः । शम्बरी २ चित्रा ३ न्यग्रोधी ४ शतमूलिका ५ प्रत्यक्श्रेणी ६ वृषा ७ चण्डा ८ पत्रश्रेणी ९ आखुकर्णिका १० मूषिककर्णी ११ प्रतिपर्णशिफा १२ सहस्रमूली १३ विक्रान्ता १४ । अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । रसबन्धकारित्वम् । ज्वरक्रिमिनाशित्वम् । शूलशमनत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

द्रवरसा, स्त्री, (द्रवो रसो यस्याः ।) लाक्षा । इति राजनिर्घण्टः ॥

द्रवाधारः, पुं, (द्रवाणां द्रव्याणामाधारः ।) चुलुकः । इति शब्दार्थकल्पतरुः ॥ द्रवद्रव्यरक्षापात्रञ्च ॥

द्रविड़ी, स्त्री, रागिणीविशेषः । इति हलायुधः ॥

द्रविणं, क्ली, (द्रवति गच्छति द्रूयते प्राप्यते वेति । द्रु+"द्रुदक्षिभ्यामिनन् ।" उणां । २ । ५० । इति इनन् ।) धनम् । (यथाह कश्चित् ।
"द्रविणं परिमितममितयशिनं जनमाकुली-
कुरुते ।
चौषाचलमिव पीनस्तनजघनायाः कुलीनायाः ॥")
काञ्चनम् । बलम् । इत्यमरमेदिनीकरौ ॥ (यथा, महाभारते । १ । १०३ । १९ ।
"एवमुक्ता तु पुत्त्रेण भूरिद्रविणतेजसा ।
माता सत्यवती भीष्ममुवाच तदनन्तरम् ॥"
पुं, धरनाम्नो वसोः पुत्रविशेषः । यथा, महाभारते । १ । ६६ । २१ ।
"धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा ॥"
पृथोः पुत्रविशेषश्च । यथा, भागवते ।४।२२।५४।
"पुत्त्रानुत्पादयामास पञ्चार्च्चिष्यात्मसम्मतान् ।
विजिताश्वं धूम्रकेशं हर्य्यक्षं द्रविणं वृकम् ॥"
कुशद्वीपस्थितसीमागिरिभेदः । यथा, भागवते । ५ । २० । १५ ।
"तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव बभ्रुश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्द्धरोमा द्रविण इति ॥" क्रौञ्चद्वीपस्थवर्षपुरुषविशेषः । यथा, भागवते ।५।२०।२२।
"यासामम्भः पवित्रममलमुपयुञ्जानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषाः ॥")

द्रविणनाशनः, पुं, (नाशयतीति । नाशि+ल्युः । द्रविणानां नाशनः । तत्सेवनेन धनविनाशात् अस्य तथात्वम् ।) शोभाञ्जनवृक्षः । इति शब्दरत्नावली ॥

द्रविणोदाः, [स्] पुं, अग्निः । अस्य निरुक्तिर्यथा,—
"द्रविणं बलमित्युक्तं धनञ्च द्रविणं ततः ।
ददाति तद्भवानेव द्रविणोदास्ततो भव ॥"
इति वराहपुराणम् ॥
(धनप्रदे, त्रि । यथा, ऋग्वेदे । १ । १५ । ७ ।
"द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे ॥"
"कीदृशं देवं द्रविणोदाः धनप्रदम् । यद्वा, धनप्रदोऽग्निः सोमं पिबत्विति शेषः । तमेतं मन्त्रं यास्क एवं निर्वक्ति,—द्रविणोदाः कस्मात् धनं द्रविणमुच्यते यदेनदभिद्रवन्ति बलं वा द्रविणं यदेनेनाभिद्रवन्ति तस्य दाता द्रविणोदास्तस्यैषा भवति द्रविणोदा द्रविण स इत्यादि सोऽयं यास्कोक्तो निर्व्वचनप्रपञ्चः तस्मिन्नेव ग्रन्थेऽव गन्तव्यः । द्रविणोदाः द्रुदक्षिभ्यामिनन् गिस्वादाद्युदात्तो द्रविणशब्दः तद्ददातीति द्रविणोदाः । क्विप् चेति क्विप् । पूर्ब्बपदस्य सकारोपजनश्छान्दसः । तत्वोले । कृदुत्तरपदप्रकृतिस्वरत्वम् । देवविशेषणत्वेनैकवाक्यतापक्षे द्वितीयायाः सुस्वादेशः । अथवा द्रविणमात्मन इच्छन्ति द्रविणस्यन्ति । सुप आत्मनः क्यच् सर्व्वप्रातिपदिकेभ्यो लालसायां सुगवक्तव्य इति क्यचि परतः सुगागमः द्रविणस्यतेः सम्पदादित्वाद्भावे क्विप् । अतो लोपः । क्वौलुप्तं न स्थानिवद्भवतीति तस्य स्थानिवत्त्वप्रतिषेधाद्यलोपः एवंद्रविणसशब्दो धनेच्छावचनः । द्रविणेच्छान्दस्यति यद्देवधनप्रदानेनोपक्षयतीत्यर्थे तस्य उपक्षये इत्यस्मादन्तर्भावितण्यर्थात् क्विप् चेति क्विप् । एवं द्रविणोदःशब्दः सकारान्तो भवति । तथा द्राविणोदसः प्रवादा भवन्तीत्यनेनैवोक्तो धवड़ार उपपद्यते अतो द्रविणोदसशब्दः भिन्नवाक्यत्वे स्वार्थे प्रथमा । एकवाक्यत्वे तु सत्ययेन द्वितीयार्थो भवति द्रविणस इत्यत्रापि वाक्यभेदपक्षे द्रविणसः सोमस्येत्यर्थे सकारोपजनश्छान्दसः । आद्युदात्तत्वन्तु नियमेन स्थितम् । ऋत्विग्विशेषणत्वेनैकवाक्यत्वपक्षे तु असन्तात् क्विप् । अतो लोपादिपूर्ब्बवत् । अत्र तु पक्षे व्यवच्छिन्नेनाम्नोदात्तत्वे प्राप्ते व्यत्ययेनाद्युदात्तम् ॥" इति सायनः ॥)

द्रवीकरणं, क्ली, अद्रवस्य द्रवकरणम् । इति च्विप्रत्ययेन साध्यम् ॥ गलान इति भाषा ॥

द्रव्यं, क्ली, (द्रोरिव । द्रु+"द्रव्यञ्च भव्ये ।" ५ । ३ । १०४ । इति यत्प्रत्ययेन निपातनात् साधुः ।) वस्तु । (यथा, मनुः । ७ । ६ ।
"एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम् ॥")
तस्य क्रियाविशेषे नवपुराणभेदेन प्रशस्तत्वं यथा,—
"द्रव्याण्यभिनवान्येव प्रशस्तानि क्रियाविधौ ।
ऋते गुड़घृतक्षौद्रधान्यकृष्णाविड़ङ्गतः ॥"
इति नारायणदासकृतपरिभाषा ॥